ङ-कारो भैरवः ख्यातो ङकारो विषये स्मृतः ।
च-कारश्चन्द्रमाः ख्यातस्तस्करश्च प्रकीर्त्तितः ॥ १२ ॥
निर्म्मलं छं समाख्यातं तरणौ छः प्रकीर्त्तितः ।
छेदने छः समाख्यातो विद्वद्भिः शब्दकोविदैः ॥ १३ ॥
वेगिते जः समाख्यातो जघने जः प्रकीर्त्तितः ।
जेता च जः समाख्यातः प्रसिद्धैः शब्दकोविदैः ॥ १४ ॥
झञ्झावाते झ-कारः स्यान्नष्टे झः समुदाहृतः ।
ञ-कारो गायने प्रोक्तो ञकारो घर्घरध्वनौ ॥ १५ ॥
टङ्कारे टः पृथिव्यां टा टो ध्वनौ च प्रकीर्त्तितः ।
ठो महेश्वर आख्यातः शून्ये च ठः प्रकीर्त्तितः ॥ १६ ॥
बृहद्ध्वनौ च ठः प्रोक्तस्तथा चन्द्रस्य मण्डले ।
ड-कारः शङ्करः प्रोक्तस्त्रासध्वन्योः प्रकीर्त्तितः ॥ १७ ॥
ढ-कारः कीर्त्तिता ढक्का निर्गुणे च ध्वनावपि ।
ण-कारः कीर्त्तितो ज्ञाने निर्णयेऽपि प्रकीर्त्तितः ॥ १८ ॥
त-कारः कथितश्चौरः क्रोड़े पुच्छे प्रकीर्त्तितः ।
शिलोच्चये थ-कारः स्यात् थकारोभयरक्षणे ॥ १९ ॥

दं कलत्रे समाख्यातं दो दान-च्छेद-धातुषु।
धं धने च धनेशे धो धा धातरि निदर्शितः॥ २०॥
धिषणा धीः समाख्याता धूश्च स्याद्भारचिन्तयोः।
न-कारः सुगते बन्धे नुः स्तुतौ च प्रकीर्त्तितः॥ २१॥
नेता नीश्च समाख्यातस्तरणौ नौः प्रकीर्त्तिता।
पवने पः समाख्यातः पाः पाने पाश्च पातरि॥ २२॥
झञ्झावाते फ-कारः स्यादक्षरे च प्रकीर्त्तितः।
कोपे फिश्च समाख्यातस्तथा निष्फलभाषणे॥ २३॥
प्रचेता वः समाख्यातः कलसे वः प्रकीर्त्तितः।
पक्षी च विर्निगदितो गमने विः प्रकीर्त्तितः॥ २४॥
नक्षत्रं भं बुधैः प्रोक्तं भ्रमरे भः प्रकीर्त्तितः।
भा दीप्तिरपि भूर्भूमिर्भीर्भयं कथिता बुधैः॥ २५॥
मः शिवश्चन्द्रमा वेधा मा च लक्ष्मीः प्रकीर्त्तिता।
मा च मातरि माने च बन्धने मूः प्रकीर्त्तिता॥ २६॥
यशो यः कथितः शिष्टैर्यो वायुरिति शब्दितः।
याने यातरि यस्त्यागे कथितः शब्दवेदिभिः॥ २७॥
रः स्यात् कामेऽनिले वह्नौ शब्दे रुः परिकीर्त्तितः।
धने रा रीश्च रोधान्ये रुर्भये च प्रकीर्त्तितः॥ २८॥
ल इन्द्रे लवणे लः स्याल्लादाने श्लेषणेऽपि लीः।
वदन्ति शं बुधाः श्रेयः शश्च शास्ता निगद्यते॥ २९॥
शीः शसं शयनं चाहुर्हिंसा शूश्च निगद्यते।
ष-कारः कीर्त्त्यते श्रेष्ठे षूश्च गर्भविमोचने॥ ३०॥

सोऽपसर्गः समाख्यातः सा तु लक्ष्मीर्निगद्यते ।
सा चैव गौः समाख्याता संसर्गः सः प्रकीर्त्तितः ॥ ३१ ॥
हः कोपे धारणेऽपि स्यात् हः शूलिनि समीरितः ।
क्षः क्षेत्रे रक्षसि प्रोक्तो नियतं शब्दवेदिभिः ॥ ३२ ॥

इति श्रीपुरुषोत्तमदेवविरचित
एकाक्षरकोषः समाप्तः ॥

वीजनिघण्टुः।

अथ वक्ष्ये मन्त्रकोषं यदुक्तं भूतडामरे।
क्रमाद्वीजविधानञ्च स्मृत्यर्थं ज्ञानसम्भवम्॥

श्रीशिव उवाच।

अ विद्युज्जिह्वा, आ कालवक्त्री, इ गर्ज्जिनी, ई धूम्रभैरवी, उ कालकूटा, ऊ विदारी, ऋ महारौद्री, ॠ भयङ्करी, ऌ संहारिणी, ॡ करालिनी, ए ऊर्द्ध्वकेशी, ऐ उग्रभैरवी, ओ भीमाक्षी, औ डाकिनी, अं रुद्रडाकिणी, अः चण्डिका, क क्रोधीशः, ख वारणः, ग चण्डः, घ कामुकः, ङ उन्मत्तभैरवी, च ज्वालमुखः, छ रक्तदंष्ट्रः, ज असिताङ्गः, झ वलयामुखः, ञ विद्युन्मुखः, ट महाज्वाली, ठ कपाली, ड भीषणः, ढ गुरुः, ण प्रहारी, त रौरवः, थ दण्डी, द वलितः, ध शूलधृक्, न सिंहनादी, प कपर्द्दी, फ प्रलयाग्निः, ब भयङ्करः, भ बहुरूपी, म महाकालः, य स्थिरात्मा, र क्षतजोक्षितः, ल बलभेदी, व रक्तपटः, श चण्डीशः, ष ज्वलनध्वजः, स धूम्रध्वजः, ह व्योमवक्त्रः,

च त्रैलोक्यस्याग्रनायकः ॥ नयनश्रोत्रास्याद्दक्षु न्यसेद्दशस्वराः
विद्युज्जिह्वा कालवक्त्रा महाकालावलङ्कृता ॥

ॐ विषवीजं श्रुतिपथं धवं हालाहलं च यत् ।
चण्डीशः क्षतजारूढ़ो धूम्रभैरव्यलङ्कृतः ।
नादविन्दुसमायुक्तो वीजं विष्णुप्रियात्मकम् ॥ श्रीं ॥
क्षतजस्थं व्योमवक्त्रं धूम्रभैरव्यलङ्कृतम् ।
नादविन्दुसमायुक्तं वीजं प्राथमिकं स्मृतम् ॥ क्रीं ॥
क्रोधीशः क्षतजारूढ़ो धूम्रभैरव्यलङ्कृतः ।
नादविन्दुसमायुक्तः पितृभूवासिसम्मतः ॥ क्रीं ॥
विदारीयुक्तं व्योमास्यं रुद्राकिण्यलङ्कृतम् ॥ हूं ॥
नादविन्दुसमायुक्तां समादायोग्रभैरवीम् ।
भौतिकं वाग्भवं वीजं विद्धि बुद्धिप्रवर्द्धनम् ॥ ऐं ॥
प्रलयाग्निर्म्महाज्वाली विद्युज्जिह्वां विनास्त्रकण्टक् ॥ फट् ॥
क्रोधीशरक्तभीमाद्यङ्कुशोऽयं नादविन्दुमान् ॥ क्रों ॥
द्विठः शिरोवह्निजाया स्वाहा ज्वलनवल्लभा ॥ स्वाहा ॥
क्रोधीशो बलभेदी च धूम्रभैरव्यलङ्कृतम् ।
नादविन्दुसमायुक्तं कामं राज्यकरं परम् ।
त्रिमूर्त्तिर्म्मन्मथः कामः सरोजः काममोहनः ॥ क्लीं ॥
व्योमास्यं कालकूटाढ्यं नादिनीविन्दुसंयुतम् ॥ हुं ॥
व्योमास्यं क्षतजारूढ़ं डाकिन्यानादविन्दुभिः ।
ज्योतिर्म्मन्त्वं समाख्यातं महापातकनाशनम् ॥ ह्रौं ॥

संयुक्तं धूम्रभैरव्या रक्तास्थं रौरवाह्वयम्।
नादविन्दुसमायुक्तं धूम्रध्वजसमन्वितम्॥ स्त्रीं॥
बहुरूपिसमायुक्तं विशेषार्थोंमहामनुः।
विदार्य्यालिङ्गितं गृह्य तथैव चतजोच्चितः॥ भ्रूं॥
धूम्रध्वजाधः कालाग्नि सोर्द्धकेशीन्दुविन्दुभिः।
युगान्तकारकं वीजं भैरवेन प्रकाशितम्॥ स्फ्रें॥
संहारिण्यास्थितश्चोर्द्धकेशिनस्तु कपर्द्दिनम्।
नादविन्दुसमायुक्तं वीजं वेतालिकं स्मृतम्॥ म्लैं॥
सनादविन्दुं क्रोधीशं गृह्य संहारिणीस्थितम्।
कल्पिनीवीजमित्युक्तं द्विठेनोक्ता मनोहरी॥ ॡं स्वाहा॥
कपर्द्दिनं समादाय चतजोच्चितसंस्थितम्।
संयुक्तं धूम्रभैरव्या घोराद्यो नादविन्दुमान्॥ प्रीं॥
कपालिद्वयमादाय महाकालेन मण्डितम्।
पुनस्तच्छ्रयमित्युक्तं चण्डिकाख्यं मनोहरम्॥ ठं ठं ठं ठः॥
प्रलयाग्निस्थितो धूम्रध्वजो यस्य सविन्दुमान्।
संयुक्तो धूम्रभैरव्या स्मृता स्फेत्कारिणी प्रिये॥ स्फ्रीं॥
चतजस्थं व्योमवक्त्रं विन्दुखण्डेन्दुलङ्कृतम्।
खद्योतमिति विख्यातं ग्रासिनि कालरात्रिके॥ ग्रं॥
चतजोच्चतमारूढ़ं नादविन्दुसमन्वितम्।
विदारीभूषणं कृत्वा वीजं वैवस्वतात्मकम्॥ ग्रूं॥
व्योमवक्त्रं धूम्रध्वजो वारुणः प्रलयाग्नि च।
ऊर्द्धकेशोच्चतारूढ़ो नादविन्दुर्द्धसंयुतम्॥ ह स ख फ्रें॥

वीजमनन्तभैरव्या मूकानन्दकरं परम्।
अ-कारे भीषणा कीर्त्तिर्व्विद्युज्जिह्वेति कीर्त्तिता।
आ-कारे तामसी कालजिह्वा च कालभैरवी॥
इ-कारे गर्ज्जिनी चण्डा विज्ञेया रुद्रभैरवी।
ई-कारे शूलिनी ख्याता चण्डोग्रा धूम्रभैरवी॥
उ-कारे कालवक्त्राख्या प्रचण्डा चण्डवल्लभा।
विदार्य्यू-कारके प्रोक्ता नालजङ्घा कपालिनी॥
ऋ-कारे स्यान्महारौद्री ज्वालिनी योगिनीत्यपि।
ॠ-कारे कलिका प्रोक्ता पिटकाली भयङ्करी॥
संहारिणी ऌ-कारे स्यान्मेघनादोग्रभाषिणी।
रुद्रचण्डा कालरात्रिः ॡ-कारे च करालिनी॥
ऊर्द्ध्वकेशी च चामुण्डा नादिन्ये-कारके स्मृता।
ऐ-कारे कोटराक्षी च मालिन्युन्मत्तभैरवी॥
ज्वालिन्यो-कारगा ज्ञेया भीमाक्षी चण्डमालिनी।
औ-कारे डाकिनी सिंहनादिनी चण्डभैरवी॥
अक्रूराख्या विदारी च अं-रि रुद्रडाकिनी।
शेषे कपालिनी याम्या चण्डिकाकुण्डलद्वयम्॥
विसर्गनादसकलाः स्वराश्च दशसूक्तरूपाः।
क्रोधीशो वारणश्चण्डः सङ्गा तून्मत्तभैरवः॥
ज्वालामुखो रक्तदंष्ट्रोऽसिताङ्गो वलयामुखः।
विद्युन्मुखो महाज्वाली कपाली भीषणो गुरुः॥

प्रहारी रौववोद्दण्डी वलितात्युग्रशूलधृक् ।
सिंहनादी कपर्द्दी च प्रलयाग्निर्भयङ्करः ॥
बहुरूपी महाकालः स्थिरात्मक्षतजोचितः ।
बलभेदी रक्तपटः चण्डीशो ज्वलनध्वजः ॥
धूम्रध्वजो व्योमवक्त्रः त्रैलोक्यस्याग्रनायकः ।
नयनश्रोत्रास्यगास्यहृत्सु न्यासे दश स्वराः ॥
ध्वजिनीधूम्रभैरव्यावभावे च दृशो स्मृतौ ।
मूलार्णमुखमादिष्टं हृदयं स्वरशक्तयः ॥
आदिमध्यावसानेषु पूर्व्वाभावे यथोत्तरम् ।
कण्ठास्याकलवक्त्रेण महाकालेन भाषितम् ॥
तदादिपञ्चरश्मिञ्च सृष्टिस्थितिलयं पंविषम् ॥
शूलिन्या सहितो ग्राह्य चण्डीशोऽग्नीन्दुविन्दुमान् ।
एतद्विष्णुप्रियाबीजं यन्मान्यं जगतः प्रियम् ॥
क्षतजं व्योमवक्त्रञ्च चण्डोग्रेन्द्राद्रिभूषितम् ।
अद्रिरौद्रञ्च भूतञ्च बीजं प्राथमिकं प्रियम् ॥
क्रोधीशं रक्तसंस्थञ्च धूम्रभैरव्यलङ्कृतम् ॥
विन्द्विन्दुसंयुतं बीजं द्रावणं क्लेदनं स्मृतम् ॥
व्योपास्यं विन्दुसंयुक्तं नालजङ्घाविभूषितम् ।
कूर्च्चं कालमहाकालं क्रोधबीजं निरञ्जनम् ॥
उन्मत्तभैरवीरुद्रडाकिन्या च विभूषितम् ।
नादेनालङ्कृतं बीजं वाग्भवं बुद्धिवर्द्धनम् ॥

फड़ित्यस्त्रं प्रसिद्धं स्याज्ज्वालाग्निर्व्यापकाङ्कुशः ।
शिरः स्वाहा द्विठो वह्निजाया ज्वलनवल्लभा ।
दक्षवामाक्षिणी चैन्द्र पाणो स ठः परिकीर्त्तितः ।
इन्द्रासनगतो ब्रह्मा सस्त्रिमूर्त्तिश्च मन्मथः ॥
गर्ज्जिणीधूम्रभैरव्यौ दक्षवामपयोधरौ ।
व्योमास्यः कालवज्राख्ये वर्म्मविन्द्विन्दुसन्निभः ॥
शून्यं क्षतजमारूढ़ं चन्द्रभैरव्यलङ्कृतम् ।
नादविन्दुयुतं मूर्द्ध्नि ज्योतिर्म्मन्त्रमुदाहृतम् ॥
आदिदेवेन निर्द्दिष्टं मन्त्रकोषमनुत्तमम् ।
यदर्थिभ्यः पुरा गुप्तं तन्मयाद्य प्रकाशितम् ॥
यक्षडामरतन्त्रस्य मन्त्रकोषविवेचनम् ।
क्रोधीशेन तु यत्प्रोक्तं भैरवाय महात्मने ॥
विद्युच्चण्डाशिनी गौरी क्रोशिनी नागिनी जया ।
किन्नरी योगिनी यक्षी भूतिनी प्रेतिनी नरी ॥
यामिनी वासिनी चण्डी कलेत्येवं प्रकीर्त्तिता ।
कालभैरवेमरसर्व्वासु भूतलाङ्गलवरासु च ॥
सुभगा सुमुखी चण्डी पार्व्वती सुरतप्रिया ।
उर्व्वशी चैन्द्रिणी लीला कङ्काली मेखला शची ॥
मानिनी हंसिनी चौला कलना भूमिनीति च ।
आदिदेवेन निर्द्दिष्टाः प्रथमाधिपशक्तयः ॥
विभ्रमो वाहुलो दण्डी भैरवो नटकः शुकः ।
वृकोदरो जटो भीष्मः क्षोभकः खचरो नटः ॥

निशाचरो ध्वजी भीमो विचित्रः कौषिको यमः।
लिङ्गी वल्माधिको भृङ्गी मणिभद्रो घटोत्कचः॥
महानन्दी शुक्रो दण्डी सुग्रीवः कलहो भवः।
दण्डी भाषान्तकोर्जेशी हंसी पत्तेश्वरो हली॥
चण्डीबीजमिति ख्यातं विद्युन्नागाङ्गनांशुकैः॥
औरसाधिकेऽंशुकाद्या च धूमिन्यसौ किन्नरः स्मृतः॥
उर्व्वंश्यालङ्कृतो हंसः हंसेन्दुमस्तकोद्धृतः।
विद्युच्चण्डा च हंसी च केतुर्नागिन्यलङ्कृता॥
दिण्डिभेन सरक्तेन कामिनी विन्दुभिः शशी॥
हंससुग्रीवपार्व्वत्या कपर्द्दीन्द्राद्यलङ्कृता॥
विग्रहकलहकामिनीन्द्रादिप्राणहारिणी॥
विभ्रमीरक्तपार्व्वत्यै स्वाहा उल्कामुखी स्मृता॥
ज्वालाम्बरीति विख्याता सविन्द्विन्दुकला नटी।
हंसः सुग्रीवचण्डाद्यैः खद्योतैः परिकीर्त्तिता॥
श्यामालिङ्गितदेहोऽसौ खद्योतो ज्योतिरीरितः॥
यमः सुग्रीवः कामिनीन्द्रेन्द्राद्यैः किन्नरीति च॥
सुग्रीवोऽपि यमश्चण्डो नीलाद्यैर्व्वाण ईरितः॥
यमः सुग्रीवविन्द्विन्दुजपाद्यः पिशिताशनः॥
त्यागिनं मणिभद्रस्थं प्रेतिनीन्द्राद्यलङ्कृतम्।
युगान्तकारकं वीजं भैरवेण प्रकाशितम्॥
भृङ्गिनं मेखलायुक्तं प्रेतिनीन्द्राद्यलङ्कृतम्।
बीजं वैतालिकं प्रोक्तं द्विठेनोक्ता मनोहरी॥

विभ्रमोधूमिनी विद्युच्चण्डिकाद्यस्तु काकिनी ।
धराद्यवीजमिति ख्यातं सर्व्वतन्त्रेषु गोपितम् ॥
नटद्वयेन धूमिन्या ऊर्द्ध्वोष्टेन लङ्कृतम् ।
नटोधवानसंयुक्तो नटीतीच्छापयोधरैः ॥
पार्व्वत्यालिङ्गितं मणिभद्रस्थं योगिनी प्रिये ।
फेत्कारिणीति विख्याता विद्युच्चण्डविभूषिता ॥
सुग्रीवास्थिलयः श्रोते हृद्यत्वाविकलाष्टशः ।
विकलायाः स्वभावे च स्याद्गौरीति च पार्व्वती ॥
मूलार्णमासमाख्यातं हृदयं स्वरशक्तयः ।
भवस्थित्यवसानेषु विज्ञातव्यं यथोत्तरम् ॥
आदिदेवेन निर्द्दिष्टं जम्बुद्वीपे कलौ युगे ॥
मन्त्रकोषमिदम्भूतयच्चडामरतन्त्रयोः ॥
मर्त्यानामुपकाराय त्रिषु लोकेषु दुर्ल्लभम् ॥
॥ * ॥ इति भैरवविरचितवीजनिघण्टुमन्त्रकोषः ॥ * ॥

अथ मातृकानिघण्टुः ॥

श्रीगणेशं नृसिंहन्तं भारतीमीश्वरं शिवम् ।
नत्वा वच्मे मातृकाणां निघण्टुं बालबुद्धये ॥ १ ॥
ध्रुवस्तारस्त्रिवृद्ब्रह्मवेदाद्यस्तारकोऽव्ययः ।
प्रणवश्च त्रिमात्रोऽपि ओङ्कारज्योतिरादिमः ॥ २ ॥
श्रीकण्ठः केशकण्ठस्थौ निवृत्तिश्च स्वरादिकः ।
अ-कारो मातृकश्चैव वात इत्यपि कीर्त्तितः ॥ ३ ॥
नारायणस्तथानन्तो मुखवृत्तो गुरुस्तथा ।
विष्णुशय्या तथा शेषो दीर्घ आ-कार एव च ॥ ४ ॥
माधवः सूक्ष्मसंज्ञश्च विद्या दक्षिणलोचनम् ।
गन्धर्व्वः पाञ्चजन्यश्च इ-कारश्च मखाङ्कुरः ॥ ५ ॥
गोविन्दश्च त्रिमूर्त्तीशः शान्तिः स्वाहामलोचनम् ।
नृसिंहास्त्रं तथा माया ई-कारोऽपि सुरेश्वरः ॥ ६ ॥
अमरेशस्तथा विष्णुरिन्धिका च गजाङ्कुशः ।
दक्षकर्णश्च विजय उ-कारो मन्मथाभिधः ॥ ७ ॥
अर्घीशो दीपिका वामश्रवणो मधुसूदनः ।
इन्द्रश्चाद्यः षण्मुखश्च ऊ-कारो रक्षणाभिधः ॥ ८ ॥
रोचिका दक्षनासा चामरभूतस्त्रिविक्रमः ।
देवमाता रिपुघ्नश्च ऋ-कारस्तपनः स्मृतः ॥ ९ ॥
अतिथीशो वामनश्च मोचिका वामनासिका ।
दैत्यमाता च देवघ्नः ॠ-कारस्त्रिपुरान्तकः ॥ १० ॥

श्रीधरश्चामरः स्याग्गुह्वदन्तगण्डस्त्रिवेदकः ।
एकाङ्घ्रिर्व्वज्रदण्डश्च व्योमार्द्ध ऌ-स्वरः स्मृतः ॥ ११ ॥
हृषीकेशो हरः सूक्ष्मो वामगण्डः कुवेरदृक् ।
अर्द्धचन्द्रो नीलचरण ॡ-कारश्च विकण्ठकः ॥ १२ ॥
झिण्टीशः पद्मनाभश्च शक्तिर्दक्षः क्षमाऽमृतम् ।
भग ऊर्द्ध्व कामरूप ए-कारश्च त्रिकोणकः ॥ १३ ॥
ज्ञानामृतो भौतिकश्च धरा दामोदरस्तथा ।
वागीशो वर्म्मभरद ऐ-कारस्त्रिपुरस्तथा ॥ १४ ॥
सद्योजातो वासुदेवो रुद्रोदन्तस्त्रिमात्रकः ।
आप्यायनी मन्त्रनाथ ओ-कारो नगसंज्ञकः ॥ १५ ॥
सङ्कर्षणोऽनुग्रहेशो मुरारिर्व्यापिनी तथा ।
अधो दन्तगतो मायी नृसिंहाङ्गन्तथौ-स्वरः ॥ १६ ॥
अक्रूरो व्योमरूपश्च प्रद्युम्नश्चन्द्रसंज्ञकः ।
अनुस्वारस्तथा विन्दुरङ्कारश्च शिरोगतः ॥ १७ ॥
अनन्तश्च महासेनोऽनिरुद्धो रसवर्णकः ।
कन्यास्तननिभः सर्गो विसर्गश्चान्तिमस्वरः ॥ १८ ॥ * ॥
एतानि स्वरनामानि । मातृकाव्यञ्जननामानि वच्मि ॥
क्रोधीशो धातृसंज्ञश्च चक्री सृष्टिकरादिगः ।
वर्गादिर्म्मायी देवेशः क-कारः कामगः स्मृतः ॥ १९ ॥
ऋद्धिर्गदी च चण्डेशः खेटो दक्षिणकूर्परः ।
कैटभश्चैव मातङ्गः संहारः खार्णकः स्मृतः ॥ २० ॥

स्मृतिः पश्चाङ्गतः गार्ङ्गी गणेशी मणिबन्धगः।
गोमुखो गजकुम्भश्च ग-कारः सिंहसंज्ञकः॥ २१॥
खड्गी शिवोत्तमो मेधा दक्षिणाङ्गुलिमूलकम्।
घनो घनस्वरश्चैव घ-कारोङ्गादिमः स्मृतः॥ २२॥
शङ्खो रुद्रकान्तिश्च दक्षाङ्गुल्यग्रसंस्थितः।
क्लीववक्त्रश्च भद्रेशो ङ-कारश्चानुनासिकः॥ २३॥
हली कूर्मेश्वरो लक्ष्मीर्व्वामबाहुर्द्दिशस्तथा।
चित्ताचारी चञ्चलश्च च-कारः स स्मृतो बुधैः॥ २४॥
एकनेत्रश्च मुषली वामकूर्परगोद्युतिः।
त्रिविन्दुकस्तथाचारी छ-कारः प्रेक्षकाभिधः॥ २५॥
स्थिरो जयन्तो जयजः शूली च चतुराननः।
मणिबन्धगतो वामो ज-कारो जपको मतः॥ २६॥
स्थितिः पाशी तथाहेशो वामाङ्गुलितलस्थितः।
स्वस्तिकं खण्डसंज्ञश्च झ-कारो जान्तसंज्ञकः॥ २७॥
वामाङ्गुल्यग्रतः सिद्धिरङ्कुशः सर्व्वसंज्ञकः।
ज्ञप्रियोह्यनुनासश्च ञ-कारश्च निरञ्जनः॥ २८॥
जरा मुकुन्दः सोमेशो दक्षपादादिगोमुखम्।
गजाङ्कुशश्च बालेन्दुरमृताद्यष्ट-कारकः॥ २९॥
लाङ्गलीशो नदक्षश्च पालिनी च कमण्डलुः।
दक्षजानुरतः स्थायी ठ-कारः स्थविरः स्मृतः॥ ३०॥
नन्दी क्षान्तिर्द्वारकश्च चामरो दक्षगुल्फगः।
व्याघ्रपादः शुभाङ्घ्रिश्च ड-कारो भौमजः स्मृतः॥ ३१॥

ईश्वरश्चार्द्धनारीशो नरः शङ्कान्तराकृतः ।
दायाद्दोऽङ्गुलमूलश्च ढ-श्च सङ्कोचकारकः ॥ ३२ ॥
उमाकान्तो नरकजिद्रतिर्दक्षपदाग्रगः ।
निर्व्वाणस्त्रिगुणाकारस्त्रिरेखी णः समीरितः ॥ ३३ ॥
वामोरुर्म्मीननिलय आषाढ़ी कामिको हरिः ।
तीव्रश्च तरलो नीलस्त-कारः कीर्त्तितो बुधैः ॥ ३४ ॥
दण्डीशो वरदः कृष्णो वामजानुगतः स्थिरः ।
सौरिश्चापि विशालाक्षी थ-कारः परिकीर्त्तितः ॥ ३५ ॥
शस्तः श्रीशो ह्लादिनी च वामगुल्फगतस्तथा ।
शूलः कुवेरो दाता च द-कारो धादिमः स्मृतः ॥ ३६ ॥
मीनेशः सात्वतः प्रीतिर्व्वामपादाङ्गुलीगतः ।
धर्म्मेशो धरणीशश्च ध-कारो दान्तिमो मतः ॥ ३७ ॥
शर्व्वीमन्त्रेश्वरो दीर्घो वामपादाङ्गुलाग्रगः ।
नरो नदी च नादी च न-कारश्चानुनासिकः ॥ ३८ ॥
तीक्ष्णा च लोहितः शूरो दक्षपाणिश्च पार्थिवः ।
पद्मेशो नान्तिमः फादिः प-कारोऽपि प्रकीर्त्तितः ॥ ३९ ॥
जनार्द्दनः शिखी रौद्री वामपार्श्वकृतालयः ।
फट्कारः प्रोच्यते सद्भिः फ-कारः पान्तिमस्तथा ॥ ४० ॥
छगलण्डो भूधरश्चाभया पृष्ठं गतस्तथा ।
सुरसो वज्रमुष्टिश्च व-कारो भादिमोऽपि च ॥ ४१ ॥
विश्वमूर्त्तिर्द्दिरण्डेशो निद्रा नाभिगतस्तथा ।
भृकुटी च भरद्वाजो भ-कारश्च भयावहः ॥ ४२ ॥

वैकुण्ठश्च महाकालस्तन्द्री जठरसंस्थितः ।
मन्त्रेशो मण्डलो मानी विषं सूर्य्यौ म-कारकः ॥ ४७ ॥
क्षुधा बाली च वायुस्त्वग्हृद्गतः पुरुषोत्तमः ।
यमुना यामुनेयश्च य-कारो मान्तिमः स्मृतः ॥ ४४ ॥
क्रोधिनी च भुजङ्गेशो बाली रुधिरपावकौ ।
रो विम्बं दक्षिणांशश्च रुचिरो रेफ ईरितः ॥ ४५ ॥
क्रिया ककुदो मांसश्च पिनाकी भूर्व्वलानुजः ।
नयश्च शठसंज्ञश्च वायवीयो ल-कारकः ॥ ४६ ॥
बाली वामांसनिलयो मेदो वारिदवारुणौ ।
हृत्कारी जलसंज्ञश्च चण्डीशोऽपि व-कारकः ॥ ४७ ॥
मृत्युर्व्वको वृषघ्नश्च हृदो दक्षकरस्थितः ।
शङ्कर्णोऽस्थिसंज्ञश्च श-कारो विज्ञिरीरितः ॥ ४८ ॥
वृषः श्वेतेश्वरः पीता मज्जा हृद्वामबाहुगः ।
षडाननः षडाकारः ष-कारः कीर्त्तितो बुधैः ॥ ४९ ॥
भृगुः श्वेतस्तथा हंसो हृदो दक्षिणपादगः ।
समयः सामगः शुक्रः सङ्गतिः सार्णकः शशी ॥ ५० ॥
नभो वराहो नकुली हृदो वामपदः स्थितः ।
सदाशिवोऽरुणः प्राणो हयग्रीवो ह-कारकः ॥ ५१ ॥
हृदयान्नाभिसंस्थानः शिवेशो कमलोऽसितः ।
लघुप्रयत्नश्चोपाल्यो ल-कारः प्रोच्यते बुधैः ॥ ५२ ॥
सम्वर्त्तको नृसिंहश्च हृदयान्मुखसंस्थितः ।
अनन्तः परमात्मा च बज्रकायोऽन्तिमः क्ष-कः ॥ ५३ ॥

अथ कादिमते प्रोक्तसङ्केतं राशिकं प्रति ।
अकारादिक्षकारान्तवर्णसंज्ञां क्रमाद् ब्रुवे ॥ ५४ ॥
वातो मरुदग्निवह्निधरा क्ष्मा जलवारिणी विभुः ।
स्वच्छ वरः शुची भुवनं खस्त्र शक्तियुक् ॥ ५५ ॥
प्राणस्तेजोऽस्थिरा वायुर्व्वाश्चारि स्वः प्रभा जया ।
कामो धनाददावौ च कुः पाथो व्योम तारकः ॥ ५६ ॥
शिखी गोवा तोयशून्ये जवा द्युतिरभिस्मृतिः ।
भूमीरसो नभश्चैव व्याप्तं दाहो रसाम्बुधिः ॥ ५७ ॥
वियत् स्पर्शश्च हृद्धंस इलायासाः क्रमात् स्मृताः ।
मातृकावर्णसंज्ञास्तु नरस्तच्चोद्धरेन्मनून् ॥ ५८ ॥
ग्रन्थाननेकानालोक्य महीदासेन धीमता ।
मातृकाक्षरसंज्ञेयं बद्धा स्वपरबुद्धये ॥ ५९ ॥

॥ * ॥ इति श्रीमन्महीधराचार्य्यविरचित
मातृकानिघण्टुः समाप्तः ॥ * ॥

प्रकारान्तरमातृकानिघण्टुः ।

ध्रुवस्तारस्तथौङ्कारो मूलज्योतिः शिवोऽव्ययः ।
वेदाद्यस्तारकोऽव्यक्तः शाखादिः प्रणवः स्मृतः ॥ १ ॥
मातृकाद्यः स्वराद्यश्च श्रीकण्ठः केशवो लघुः ।
कलाद्यः केशवः कृष्णो भूतेशः प्रथमो भवेत् ॥ २ ॥
वृत्तारको गुरुर्दीर्घो नारायणचतुर्म्मुखौ ।
अनन्तो वासुदेवश्च वेदान्तः कारकः स्मृतः ॥ ३ ॥
दक्षाक्षो माधवः सूक्ष्मो पाञ्चजन्यो मखाङ्कुरः ।
विड्विन्दुः परमेशश्च गन्धर्व्वः परमः स्मृतः ॥ ४ ॥
वामाक्षिश्च त्रिमूर्त्तिश्च महामाया सुरेश्वरः ।
इन्द्रमूर्त्तिर्नृसिंहाख्यं स्मृतो गोविन्द ईश्वरः ॥ ५ ॥
याम्यकर्णोऽमरेशश्च मन्मथोऽथ गजाङ्कुशः ।
विजयो विघ्नहर्त्ता च विष्णुरुकारकः स्मृतः ॥ ६ ॥
वामकर्णोऽथ वामांसो दीर्घश्च मधुसूदनः ।
इन्द्रचापोऽथ सूक्ष्मश्च षण्मुखः षट्स्वरः स्मृतः ॥ ७ ॥
दक्षनासा त्रिविक्रान्तो भारभूर्व्विग्रहाधिपः ।
ऋङ्मूर्त्तिस्तु यती धर्म्मरिपुघ्नो ऋस्वरः स्मृतः ॥ ८ ॥
वामनासा तिथीशश्च श्रीकण्ठस्त्रिपुरान्तकः ।
अमृतेशः स्वरः स्थाणुर्देवजुष्टस्वरः स्मृतः ॥ ९ ॥
याम्यगण्डस्थितः स्थाणुर्हृषीकेशस्त्रिदेवकः ।
एकाङ्घ्रिर्व्वज्रदण्डश्च व्योमाद्री लृस्वरः स्मृतः ॥ १० ॥

वामगण्डोदरार्द्धे च पद्मनाभः कुवेरदृक् ।
गणेशश्च त्रिकण्ठश्च नीलाङ्घ्रिर्द्दशमः स्वरः ॥ ११ ॥
ऊर्द्ध्वहस्तो गजज्योतिर्द्दामोदरस्त्रिकोणकः ।
झिण्टीशः कामरूपश्च शक्तिरेकारकः स्मृतः ॥ १२ ॥
अधोधरेन्द्रवागीशा वासुदेवोऽथ भौतिकः ।
त्रैपुरः प्रणतो वर्म्ममरुतौ द्वादशस्वरः ॥ १३ ॥
ऊर्द्ध्वदन्तालिजः सद्यः सङ्कर्षणस्त्रिमात्रकः ।
मन्त्रेशो नगसंज्ञश्च मात्रेशस्त्वोस्वरः स्मृतः ॥ १४ ॥
अधोदन्तानिलो मित्रः प्रद्युम्नोऽनुग्रहेश्वरः ।
नृसिंहाख्यो मुरारिश्च मायाविच्चौस्वरः स्मृतः ॥ १५ ॥
ऊर्द्ध्वदन्तश्चानिरुद्धो हरो भानुः स्वरः शशी ।
मनश्चानङ्गकवचौ निगूढ़ः अंस्वरः स्मृतः ॥ १६ ॥
कार्त्तिकेयोऽनिरुद्धश्च शिल्पाभिज्ञो रमापि च ।
सृष्टिः संहारकर्त्ता च विषं च अःस्वरः स्मृतः ॥ १७ ॥
याम्यकर्णादिकः क्रोधी वायुर्व्वह्निर्गदी रुजा ।
यादवेशो मुरारिश्च कामाङ्गः कार्णकः स्मृतः ॥ १८ ॥
दक्षिणकूर्परः खेटः शार्ङ्गी चण्डीशकः खगः ।
कटभारिश्च मातङ्गः संहारः ख्वार्णकः स्मृतः ॥ १९ ॥
मणिबन्धस्थितः सिंहः पञ्चीतकगणेश्वरौ ।
गोमुखो गजकुम्भश्च हलीशश्च गजाननः ॥ २० ॥
अङ्गुलीमूलगो मेघो मूषली च शिवोत्तमः ।
वराहो धनकामश्च शिवाऽघोघार्णकः स्मृतः ॥ २१ ॥

दक्षाङ्गुल्यग्रगः शूली क्लीवाख्यश्चैव रुद्रकः ।
डामरेशो हरिः श्रीमान् रुद्रेशो ञार्णकः स्मृतः ॥ २२ ॥
ना चामरादिकः कूर्म्मो शूली चन्द्रकसायकौ ।
भूभेत्ता चित्रचारी च चञ्चलश्चार्णको मतः ॥ २३ ॥
वामकूर्परगः पाशी परिपूर्णैकनेत्रकौ ।
त्रिबिन्दुकोज्ज्वरौ वामाश्लेषकश्छार्णकः स्मृतः ॥ २४ ॥
वाममणिबन्धगतश्चतुर्म्मुखो जयन्तकः ।
जपज्योतिरनाकारो जनक उत जार्णकः ॥ २५ ॥
अङ्गुलीमूलगः खण्डः कुमुदः स्वस्तिकः स्मृतः ।
विख्यातकः स्थिराकारौ झङ्कारो झार्णको मतः ॥ २६ ॥
वामाङ्गुल्यग्रगः सोमो नन्दो विद्विस्निरञ्जनः ।
सुधर्म्मो ह्यनुनासश्च ह्यग्निर्गौर्ञार्णकः स्मृतः ॥ २७ ॥
दक्षपादादिगोनन्दी लाङ्गली चार्द्धचन्द्रकः ।
गजाङ्कुशो मृगाद्यश्च वालेन्दुष्टार्णकः स्मृतः ॥ २८ ॥
याम्यगुल्फोऽर्द्धनारीशो भौमजो दिव्यनायकः ।
सुधाबिन्दुर्घटाकारः प्लावकष्ठार्णको मतः ॥ २९ ॥
याम्यजानुस्थितो दण्डो दारुको वल्मलो नरः ।
डामरो व्याघ्रपादश्च शूली स्त्री डार्णकः स्मृतः ॥ ३० ॥
याम्यपादाङ्गुली पूर्णोऽप्युमाकान्तस्तथा हरिः ।
शङ्खनाभिर्दृढ़ं लोहो दाहको ढार्णकः स्मृतः ॥ ३१ ॥
याम्यपादाङ्गुलाग्रस्थ आषाढ़ीशस्त्रिविक्रमः ।
त्रिरेखस्त्रिगुणाकारो निर्व्वाणो णार्णको मतः ॥ ३२ ॥

वामपादादिकस्तीव्रः ह्रस्त्यश्वतरलोऽङ्घ्रिकः ।
नीलकोऽप्यर्थको धाता तड़ित्तु तार्णको मतः ॥ ३३ ॥
वामजानुर्विशालाक्षी शौरी हक् वै कमण्डलुः ।
सूचीपूरस्थिरस्थायी स्थविरस्थार्णको मतः ॥ ३४ ॥
वामगुल्फस्थितः शूली दावी दाता कुवेरकः ।
चन्द्रकश्च हरिद्रान्तो देवेशोदार्णकः स्मृतः ॥ ३५ ॥
वामाङ्गुल्यादिको मीनो जनार्दनशिरःकराः ।
धर्म्मेशो धरणीशश्च स्थाणुः प्रीतिश्च धार्णकः ॥ ३६ ॥
वामाङ्गुल्यग्रगो मेषो भूधरोऽथ विशाम्पतिः ।
नरोऽन्तरं दिनं दीनो नदीनो नार्णकः स्मृतः ॥ ३७ ॥
याम्यपार्श्वो दक्षकुक्षिर्विश्वार्त्तिश्चैव लोहितः ।
पार्थिवः पद्मनाभश्च पद्मेशः पार्णकः स्मृतः ॥ ३८ ॥
वामपार्श्वोऽथ वैकुण्ठः शिवोऽनलस्त्रिपत्रकः ।
कान्तोरगौ सरित् फुल्लः फट्कारः फार्णको मतः ॥ ३९ ॥
पृष्ठवंशो गणेशश्च गलण्डः पुरुषोत्तमः ।
बलवान् वज्रमुष्टिश्च सुरसो वार्णकः स्मृतः ॥ ४० ॥
नाभिजश्च द्विदण्डीशो भारवाही जया बलः ।
शुभदोऽथ भरद्वाजो भृकुटी भार्णकः स्मृतः ॥ ४१ ॥
जठरो भाववीरश्च महावालो बलानुजः ।
माधवो मरणं मायी मन्त्रेशो मार्णको मतः ॥ ४२ ॥
यमोवरुणवागीशौ स्वशनो यामुनेयकः ।
मृगेन्द्रो वायुसंज्ञश्च वचनं याणकः स्मृतः ॥ ४३ ॥

अस्रग् यातुष ईषघ्नो भुजङ्गेशो हुताशनः।
तीव्रज्जोतिः परं चिह्नं सुचिरोरार्णको मतः॥ ४४ ॥
मेधा धियो जलान्तस्थः खड्गीशोऽहंसवारिदौ।
वरुणश्च शिवो रौद्रो मृतेशो वार्णकः स्मृतः॥ ४५ ॥
अस्थि धातुर्व्वराहश्च लक्ष्मीशः शङ्कुकर्णिके।
तथा नयः समिधश्च साम्बकः शार्णकः स्मृतः॥ ४६ ॥
शुक्लधातू भृगुर्हंसः सामगः सत्यसङ्गतिः।
मत्यानन्दोऽथ दीप्तास्यः समयः षार्णकः स्मृतः॥ ४७ ॥
मज्जाह्वयः श्वेतरूपो विलेपश्च घटाकृतिः।
षड़ाननः षड़ाकारः षड़टः सार्णको मतः॥ ४८ ॥
प्राणनोथ हलीशश्च हयाननसदाशिवौ।
हुताशो हाकिनी द्रावो हेरम्बो हार्णको मतः॥ ४९ ॥
नन्दी च परमात्मा च सम्बर्त्तककृतान्तकौ।
वज्रकायोऽचयो व्यापी नृसिंहः चार्णकः स्मृतः॥ ५० ॥
निघण्टुर्म्मातृकार्णानां कण्ठपीठे निधीयताम्।
विस्फोटनाय मन्त्राणां सलीलं पण्डितैर्जनैः॥ ५१ ॥
शरीरे सर्व्वमन्त्राणामुद्धाराय सुबुद्धिभिः॥ ५२ ॥

॥ * ॥ इति श्रीदेशिकमण्डलीमुकुटमाणिक्योपमपरमहंस-
श्रीमध्वाचार्य्यविरचितो मातृकानिघण्टुः
समाप्तः ॥ * ॥

अथ मुद्रानिघण्टुः ।

अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु गोपिताः ।
याभिर्व्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥ १ ॥
अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि ।
स्नाने चावाहने चैव प्रतिष्ठायाञ्च रक्षणे ॥ २ ॥
नैवेद्ये च तथान्ते च तत्तत्कर्म्मप्रकाशने ।
स्थाने मुद्राः प्रकर्त्तव्याः स्वस्वलक्षणसंयुताः ॥ ३ ॥
आवाहनादिका मुद्रा नव साधारणा मताः ।
तथा षड़ङ्गमुद्राश्च सर्व्वतन्त्रे नियोजयेत् ॥ ४ ॥
एकोनविंशतिर्म्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥ ५ ॥
वनमाला तथा ज्ञानमुद्रा विद्याह्वया तथा ।
गरुड़ाख्या तथा मुद्रा विष्णोः सन्तोषदायकाः ॥ ६ ॥
नारसिंही च बाराही हयग्रैवी धनुस्तथा ।
काममुद्रा समाख्याता शिवस्य दशमुद्रिकाः ॥ ७ ॥
लिङ्गयोनित्रिशूलाक्षमालाऽभीतिमृगाऽसिकाः ।
खट्वाङ्गा च कपालाख्या डमरुः शिवतोषदाः ॥ ८ ॥
सूर्य्यस्यैकैव पद्माख्या सप्तमुद्रा गणेशितुः ।
दन्तपाशाङ्कुशाविघ्नपरशुर्लडुकस्तथा ॥ ९ ॥
वीजपूराह्वया मुद्रा विज्ञेया शक्तिपूजने ।
पाशाङ्कुशवराभीतिखड्गचर्म्मधनुःशराः ॥ १० ॥

मुषली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ।
मुद्गरः पाशवज्राख्या जिह्वा ब्राह्मी तथैव च ॥ ११ ॥
पञ्चमुद्राः समाख्याता ब्रह्मास्त्रजपपूजने ।
लक्ष्मीमुद्रार्च्चने लक्ष्म्या वाग्वादिन्यास्तु पूजने ॥ १२ ॥
अक्षमाला तथावीणा व्याख्यापुस्तकमुद्रिके ।
सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने ॥ १३ ॥
दशमुद्राः समाख्यातास्त्रिपुरायाः प्रपूजने ।
संक्षोभद्रावणाकर्षवश्योन्मादमहाऽङ्कुशाः ॥ १४ ॥
खेचरी विजयिन्याख्या त्रिखण्डा दश कीर्त्तिताः ।
कुम्भमुद्राभिषेके स्यात् पद्ममुद्रा तथासने ॥ १५ ॥
कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ।
गालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि ॥ १६ ॥
श्रीगोपालार्च्चने वेणुर्नृहरेर्नारसिंहिका ।
वराहस्य च पूजायां वाराहाख्यां प्रदर्शयेत् ॥ १७ ॥
हयग्रीवार्च्चने चैव हयग्रैवीं प्रदर्शयेत् ।
रामार्च्चने धनुर्व्वाणमुद्रा पर्शुस्तथार्च्चने ॥ १८ ॥
पर्शुरामस्य विज्ञेया जगन्मोहनसंज्ञिका ।
जगन्मोहनपूजायां काममुद्रा तदर्च्चने ॥ १९ ॥
वासुदेवाह्वयाह्वाने कुञ्जमुद्रा तु रक्षणे ।
सर्व्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रदर्शयेत् ॥ २० ॥
उद्देशानुक्रमादायोच्यन्ते तल्लक्षणानि च ।
हस्ताभ्यामञ्जली कृत्वाऽनामिकामूलपर्व्वणोः ॥ २१ ॥

अङ्गुष्ठौ निःक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता ।
अधोमुखी त्वियं चेत् स्यात् स्थापनी मुद्रिका स्मृता ॥२२॥
उच्छ्रिताङ्गुष्ठमुष्ट्योश्च संयोगात् सन्निधापनी ।
अन्तःप्रवेशिताङ्गुष्ठा सैव संबोधिनी मता ॥ २३ ॥
उत्तानमुष्टियुगला सम्मुखीकरणी मता ।
देवताङ्गे षड़ङ्गानां न्यासस्य सकलीकृतिः ॥ २४ ॥
सव्यहस्तवक्रमुष्टिर्दीर्घाधोमुखतर्ज्जनी ।
अवगुण्ठनमुद्रेयमभितो मुष्टिचञ्चला ॥ २५ ॥
अन्योन्याभिमुखाश्लिष्टकनिष्ठे नामिके पुनः ।
तथैव तर्ज्जनीमध्ये धेनुमुद्रेयमीरिता ॥ २६ ॥
अमृतीकरणं कुर्य्यात्तया साधकसत्तमः ।
अन्योन्यग्रथिताङ्गुष्ठप्रसारितकराङ्गुलौ ॥ २७ ॥
महामुद्रेयमुदिता परमीकरणी बुधैः ।
प्रयोजयेदिमा मुद्रा देवताह्वारकर्म्मणि ॥ २८ ॥
अङ्गन्यासक्षमा मुद्रास्तासां लक्षणमुच्यते ।
अनङ्गुष्ठाऽऽर्जवा हस्तशाखा भवेन्मुद्रा हृदये शीर्षके च ।
अधोङ्गुष्ठा खलु मुष्टिः शिखायां करद्वन्द्वाङ्गुल्यो वर्म्मणि स्युः ॥२९॥
नाराचमुक्तपृथगुद्धतबाहुयुग्म-
काङ्गुष्ठतर्ज्जमुदितोर्द्धनिविष्टदृक्तु ।
कथितास्त्रमुद्रा यत्राक्षिणी तर्ज्जनिमध्यमे स्तः ॥ ३० ॥
नेत्रत्रयं यत्र भवेदनामा षड़ङ्गमुद्रा कथिता विधिज्ञैः ।
वैष्णवानान्तु मुद्राणां कथ्यन्ते लक्षणानि तु ॥ ३१ ॥

वामाङ्गुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना।
कृत्वोत्तानां ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ॥ ३२ ॥
वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः।
दक्षिणाङ्गुष्ठसंस्पृष्टाः स्वस्वमुद्रेयमीरिता ॥ ३३ ॥
हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सुप्रसारितौ।
कनिष्ठाङ्गुष्ठसंलग्नौ मुद्रैषा चक्रसंज्ञिका ॥ ३४ ॥
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली।
अङ्गुल्यौ मध्यमे भूयः संलग्ने सुप्रसारिते ॥ ३५ ॥
गदा मुद्रेयमाख्याता विष्णोः सन्तोषवर्द्धनी।
हस्तौ तु सम्मुखौ कृत्वा सन्नतावुन्नताङ्गुली ॥ ३६ ॥
तलान्तर्म्मिलिताङ्गुष्ठौ मुद्रैषा पद्मसंज्ञिका।
ओष्ठे वामकराङ्गुष्ठो लग्नस्तत्र कनिष्ठिका ॥ ३७ ॥
दक्षिणाङ्गुष्ठसंलग्ना तत्कनिष्ठाप्रसारिता।
तर्ज्जनीमध्यमानामाः किञ्चित् सङ्कोच्य चालिताः ॥३८॥
वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः।
अन्योन्यस्पृष्टकरयोर्म्मध्यमानामिकाङ्गुली ॥ ३९ ॥
अङ्गुष्ठेन तु बध्नीयात् कनिष्ठामूलसंश्रिते।
तर्ज्जन्यौ वक्रयेदेषा मुद्रा श्रीवत्ससंज्ञिका ॥ ४० ॥
अनामिकापृष्ठलग्नां दक्षिणस्य कनिष्ठिकाम्।
कनिष्ठया दृढं बद्धा तर्जन्या दक्षया तथा ॥ ४१ ॥
वामामनामां बध्नीयाद्दक्षिणाङ्गुष्ठमूलके।
अङ्गुष्ठानामे वामे संयोज्य सरलमायतम् ॥ ४२ ॥

चलश्रोण्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका ।
स्पृशेत् कण्ठादिपादान्तं तर्जन्याङ्गुष्ठनिष्ठया ॥ ४७ ॥
करद्वयेन माला च मुद्रेयं नवमालिका ।
तर्ज्जन्यङ्गुष्ठके सक्ता वक्रतो हृदि विन्यसेत् ॥ ४४ ॥
वामहस्तानुजं वामजानुमूर्द्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य वल्लभा ॥ ४५ ॥

अङ्गुष्ठं वामसंज्ञं तदितरकरकाङ्गुष्ठकेनापि बद्धा
तस्याङ्गं पीठयित्वाङ्गुलीभिरपि पुनर्व्वामहस्ताङ्गुलीभिः ।
बद्धा गाढ़ं हृदिस्था यजतु विमलधीर्व्याहरन्मारबीजं
विल्वाख्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया विधिज्ञैः॥४६

हस्तौ तु विमुखौ कृत्वा ग्रन्थयित्वा कनिष्ठके ।
मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥ ४७ ॥
मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत् ।
एषा गरुड़मुद्रा स्याद्विष्णोः सन्तोषवर्द्धनी ॥ ४८ ॥
जानुमध्ये शिरः कृत्वा चिवुकोष्ठौ समाकृतौ ।
हस्तौ तु भूमिसंलग्नौ कम्पमानौ पुनः पुनः ॥ ४९ ॥
मुखं विवृत्तकं कृत्वा लेलिहानं च जिह्विकाम् ।
नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्द्धिनी ॥ ५० ॥
अङ्गुष्ठाभ्याञ्च करयोरथाक्रम्य कनिष्ठिके ।
अधोमुखीभिः सर्व्वाभिर्मुद्रेयं नृहरेः स्मृता ॥ ५१ ॥
दक्षोपरि करं वामं कृत्वोत्तानमधः सुधीः ।
भ्रामयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥ ५२ ॥

दक्षहस्तञ्चोर्द्ध्वमुखं वामहस्तमधोमुखम् ।
अङ्गुल्यग्रन्तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥ ५३ ॥
वामहस्ततले कृत्वा दक्षाङ्गुलिमधोमुखीम् ।
संरोप्य मध्यमानामे मुखस्याधो विकुञ्चयेत् ॥ ५४ ॥
हयग्रीवप्रिया मुद्रा तन्मूर्त्तिरनुकारिणी ।
वामस्य मध्यमाग्रन्तु तर्ज्जन्यग्रे तु योजयेत् ॥ ५५ ॥
अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीड़येत् ।
स्पर्शयेद्वामके स्कन्धे धनुर्म्मुद्रेयमीरिता ॥ ५६ ॥
दक्षमुष्टिस्तु तर्ज्जन्या दीर्घया वाणमुद्रिका ।
तले तलन्तु करयोस्तिर्य्यक् संयोज्य चाङ्गुलीः ॥ ५७ ॥
संहताः प्रसृताः कुर्य्यान्मुद्रेयं पर्शुसंज्ञिका ।
मूर्द्धस्थाङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी ॥ ५८ ॥
हस्तौ तु सम्पुटौ कृत्वा प्रसृताङ्गुलिकौ तथा ।
तर्ज्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमाश्रितौ ॥ ५९ ॥
वाममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी ।
सदाशिवप्रियाणाञ्च कथ्यन्ते लक्षणानि च ॥ ६० ॥
उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन बन्धयेत् ।
वामाङ्गुलीर्द्दक्षिणाभिरङ्गुलीभिश्च बन्धयेत् ॥ ६१ ॥
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ।
मिथः कनिष्ठिके बद्धा तर्ज्जनीभ्यामनामिके ॥ ६२ ॥
अनामिकोर्द्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ।
अङ्गुष्ठाग्रद्वयं न्यस्येद्योनिमुद्रेयमीरिता ॥ ६३ ॥

अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा दक्षाङ्गुलीत्रयम् ।
प्रसारयेत्त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ॥ ६४ ॥
अधःकृतदक्षहस्तप्रसृतो वरमुद्रिका ।
ऊर्द्धंकृतवामहस्तप्रसृतोऽभयमुद्रिका ॥ ६५ ॥
मिलितानामिकाङ्गुष्ठे मध्यमाग्रन्तु योजयेत् ।
शिष्टाङ्गुल्युच्छ्रिते कुर्य्यान्मृगमुद्रेयमीरिता ॥ ६६ ॥
पञ्चाङ्गुल्यो दक्षिणास्तु मिलिता ऊर्द्धमुन्नताः ।
खट्वाङ्गमुद्रा विख्याता शिवस्यातिप्रिया मता ॥ ६७ ॥
पात्रवद्वामहस्तञ्च कृत्वा वामांसके तथा ।
निधायोच्छ्रितवत् कुर्य्यान्मुद्रा कापालकी मता ॥ ६८ ॥
मुष्टिञ्च शिथिलां बद्ध्वा ईषदुच्छ्रितमध्यमाम् ।
दक्षिणामूर्द्धमुत्तोल्य कर्णदेशे प्रचालयेत् ॥ ६९ ॥
एषा मुद्रा डमरुका सर्व्वविघ्नविनाशिनी ।
ततो गणेशमुद्राणामुच्यन्ते लक्षणानि च ॥ ७० ॥
उत्तानोर्द्ध्वमुखी मध्या सरलावद्धमुष्टिका ।
दन्तमुद्रा समाख्याता सर्व्वागमविशारदैः ॥ ७१ ॥
वाममुष्टिस्थतर्ज्जन्या दक्षमुष्टिस्थतर्ज्जनीम् ।
संयोज्याङ्गुष्ठकाग्राभ्यां तर्ज्जन्यग्रे स्वके क्षिपेत् ॥ ७२ ॥
एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्त्तिता ।
ऋज्वीञ्च मध्यमां कृत्वा तर्ज्जनीं मध्यपर्व्वणि ॥ ७३ ॥
संयोज्याकुञ्चयेत् किञ्चिन्मुद्रैषाङ्कुशसंज्ञिका ।
तर्ज्जनीमध्यमासन्धिनिःसृताङ्गुष्ठमुष्टिका ॥ ७४ ॥

अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ।
परशुमुद्रा गदिता प्रसिद्धा लड्डुमुद्रिका ॥ ७५ ॥
वीजपूराह्वयामुद्रा प्रसिद्धत्वादुपेक्षिता ।
शाक्तेयानाञ्च मुद्राणां कथ्यन्ते लक्षणानि च ॥ ७६ ॥
पाशाङ्कुशवराभीतिधनुर्व्वाणाः समीरिताः ।
कनिष्ठानामिके बद्ध्वा स्वाङ्गुष्ठेनैव दक्षिणः ॥ ७७ ॥
श्लिष्टाङ्गुली च प्रष्टन्ते सम्मुखः खण्डमुद्रिका ।
वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसारयेत् ॥ ७८ ॥
आकुञ्चिताङ्गुली कुर्य्याच्चर्म्ममुद्रेयमीरिता ।
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणाम् ॥ ७९ ॥
कुर्य्यान्मूषलमुद्रेयं सर्व्वविघ्नविनाशिनी ।
मुष्टिं कृत्वा कराभ्याञ्च वामस्योपरिदक्षिणाम् ॥ ८० ॥
कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता ।
चक्रमुद्रा तथा कृत्वा मध्यमे द्वे प्रसार्य्य च ॥ ८१ ॥
कनिष्ठिके तथानीय तदग्रेऽङ्गुष्ठकौ क्षिपेत् ॥ ८२ ॥
लक्ष्मीमुद्रा तथाख्येषा सर्व्वसम्पत्तिकारिणी ॥
मुद्गरं पापजिह्वाञ्च प्रसिद्धत्वादुपेक्षिते ।
वामाङ्गुष्ठमधःकृत्वा अङ्गुलीभिर्निरुध्य च ॥ ८३ ॥
ब्राह्मीमुद्रेति विख्याता ब्रह्मास्त्रजपकर्म्मणि ।
वीणा मुद्रा समाख्याता सरस्वत्याः प्रियङ्करी ॥ ८४ ॥
वामाङ्गुष्ठं स्वाभिमुखं कृत्वा पुस्तकमुद्रिका ।
दक्षिणाङ्गुष्ठतर्ज्जन्यावग्रलग्ने तथाङ्गुलीः ॥ ८५ ॥

प्रसार्य्य संहतोत्ताना एषा व्याख्यानमुद्रिका ।
रामस्य च सरस्वत्या अत्यन्तप्रेयसी मता ॥ ८६ ॥
मणिबन्धस्थितौ कृत्वा प्रसृताङ्गुलिकौ करौ ।
कनिष्ठाङ्गुष्ठयुगले मिलित्वाथ प्रसारयेत् ॥ ८७ ॥
सप्तजिह्वाख्यमुद्रेयं वैश्वानरप्रियङ्करी ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेऽन्तरे ॥ ८८ ॥
तर्ज्जनीमध्यमानामाः संहता भुग्नवर्ज्जिताः ।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता ॥ ८९ ॥
दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशात्मकां मुष्टिं कुर्य्यात् सा कुम्भमुद्रिका ॥ ९० ॥
मुष्ट्योरूर्द्ध्वकृताङ्गुष्ठौ तर्ज्जन्यग्रे सुविन्यसेत् ।
सर्व्वरक्षाकरी ह्येषा कुम्भमुद्रा समीरिता ॥ ९१ ॥
प्रसृताङ्गुलिकौ हस्तौ मिथः श्लिष्टौ च सम्मुखौ ।
कुर्य्याच्च हृदये चेदं मुद्रा प्रार्थनसंज्ञिका ॥ ९२ ॥
अञ्जल्याञ्जलिमुद्रा स्यात् वासुदेवप्रियैव सा ।
अङ्गुष्ठावुन्नतौ कृत्वा मुष्ट्योः संलग्नयोर्द्वयोः ॥ ९३ ॥
तावेवाभिमुखीकृत्वा मुद्रैषा कामवर्षिणी ।
दक्षिणाङ्गुष्ठनिविड़ा नासिकार्पिततर्ज्जनी ॥ ९४ ॥
मुद्रा विस्मयसंज्ञा स्याद्विस्मयावेषकारिणी ।
मुष्टिरूर्द्ध्वकृताङ्गुष्ठा दक्षिणोदयमुद्रिका ॥ ९५ ॥
तर्ज्जन्यङ्गुष्ठसंयोगादग्रतो विन्दुमुद्रिका ॥ ९६ ॥
अधोमुखं वामहस्तं ऊर्द्ध्वं दक्षिणहस्तकम् ।

च्छिन्नाङ्गुलीभिः संयोज्य हस्तौ तु परिवर्त्तयेत् ।
एषा संहारमुद्रा स्याद्विसर्ज्जनविधौ मता ॥ ९७ ॥
वामकेश्वरतन्त्रोक्ताः प्रकाश्यन्तेऽत्र मुद्रिकाः ॥ ९८ ॥

श्रीशिव उवाच ।

शृणु देवि प्रवक्ष्यामि मुद्राः सर्व्वार्थसिद्धिदाः ।
याभिर्व्विरचिताभिस्तु सान्निध्या त्रिपुरा भवेत् ॥ ९९ ॥
परिवृत्तकरौ स्पृष्ट्वा अङ्गुष्ठौ कारयेत् समौ ।
अनामान्तर्गते कृत्वा तर्ज्जन्यौ कुटिलाकृती ॥ १०० ॥
कनिष्ठिकेन युञ्जीत निजस्थाने महेश्वरि ।
त्रिखण्डेयं समाख्याता त्रिपुराह्वानकर्म्मणि ॥ १०१ ॥
मध्यमामध्यगे कृत्वा कनिष्ठाङ्गुष्ठयोरधः ।
तर्ज्जन्यौ दण्डवत्कृत्वा मध्यमापर्व्वनामिके ।
एषा तु प्रथमा मुद्रा सर्व्वसंक्षोभकारिणी ॥ १०२ ॥
तस्या एव तु मुद्राया मध्यमे सरले यदा ।
क्रियते परमेशानि तदा विद्राविणी भवेत् ॥ १०३ ॥
मध्यमा तर्ज्जनीभ्यान्तु कनिष्ठानामिके समे ।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि ।
इयमाकर्षणी मुद्रा त्रैलोक्याकर्षणी मता ॥ १०४ ॥
यूपाकारौ करौ कृत्वा तर्ज्जन्यावङ्कुशाकृती ।
परिवर्त्य क्रमेणैव मध्यमे तदधोगते ॥ १०५ ॥
क्रमेण देवि तेनैव कनिष्ठानामिकादयः ।
संयोज्या निविड़ाः सर्व्वा अङ्गुष्ठस्याग्रदेशतः ।

मुद्रेयं परमेशानि सर्व्ववश्यकरी मता ॥ १०६ ॥
सम्मुखौ तु करौ कृत्वा मध्यमा मध्यगं त्यजेत् ।
अनामिके तु सरले तद्वहिस्तर्ज्जनीद्वयम् ॥ १०७ ॥
दण्डाकारौ ततोऽङ्गुष्ठौ मध्यमानखदेशगौ ।
मुद्रैषोन्मादिनी नाम क्लेदिनी सर्व्वयोषिताम् ॥ १०८ ॥
अस्यान्त्वनामिकायुग्ममधःकृत्वाङ्कुशाकृति ।
तर्ज्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशा मुद्रा सर्व्वकामार्थसाधिनी ॥ १०९ ॥
सव्यं दक्षिणहस्ते तु सव्यहस्ते तु दक्षिणम् ।
वाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्य च ॥ ११० ॥
कनिष्ठानामिके देवि युक्ते तेन क्रमेण च ।
तर्ज्जनीभ्यां समाक्रान्ते सर्व्वोर्द्ध्वमपि मध्यमे ॥ १११ ॥
अङ्गुष्ठौ तु महेशानि सरलावपि कारयेत् ।
इयं सा खेचरी नाम मुद्रा सर्व्वोत्तमा मता ॥ ११२ ॥
परिवर्त्य करौ स्पृष्ट्वा अर्द्धचन्द्राकृती प्रिये ।
तर्ज्जन्याङ्गुष्ठयुगलं युगपत् कारयेत्ततः ॥ ११३ ॥
अधः कनिष्ठिकाङ्गुष्ठौ तदधो विनियोजयेत् ।
तथैव कुटिले योज्य सर्व्वाधस्तादनामिके ।
वीजमुद्रेयमचिरात् सर्व्वसस्यद्धिवर्द्धनी ॥ ११४ ॥
मध्यमे कुटिले कृत्वा तर्ज्जन्युपरि संस्थिते ।
अनामिकामध्यगते तथैव हि कनिष्ठिके ॥ ११५ ॥
सर्व्वा एकत्र संयोज्य अङ्गुष्ठपरिपीड़िताः ।

एषा तु प्रथमा मुद्रा योनिमुद्रेयमीरिता ॥ ११६ ॥
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली।
अङ्गुष्ठमध्यमे भूयः संलग्ने सुप्रसारिते।
महामुद्रेति विख्याता परा मुक्तिकरी तथा ॥ ११७ ॥
एता मुद्रा महेशानि त्रिपुराया मयोदिताः।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥ ११८ ॥
इतीदं कथितं भद्रे मुद्राणां लक्षणं स्फुटम्।
पूजाकाले जपे स्नाने देवतासन्निधायकम्।
गोप्यं कुरु महादेवि न देयं कितवे शठे ॥ ११९ ॥

॥*॥ इति श्रीवामकेश्वरतन्त्रे उमामहेश्वरसंवादे
मुद्रानिघण्टुः समाप्तः ॥*॥

सूचीपत्रम् ।

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
खङ्गी	खड्गी	२	१४
मन्वा	मत्वा	४	१८
क्लीं वं	क्लीवं	४	१५
सुद्धो	शुद्धो	८	७
शङ्खिणी	शङ्खिनी	१६	१७
स्थलगण्ड:	छगलण्ड	१८	६
पिणाकीशो	पिनाकीशो	२०	८
शिव:	शिर:	२१	१०
पुरा देवो	पुरादेवो	२१	१६
स्वाह्लादाने	स्वाह्ला दाने	२५	१९
स्याद्दक्षुन्यसे दश,	स्यनासाहृत्सु न्यासे दश	२८	१
वोजं	वीजं	२८	३
स्फेत्कारिणी	फेत्कारिणी	२९	१६
कलिका	कालिका	३०	८
अं-रे	अंकारे	३०	१६
सङ्का	शङ्का	३०	१९
रौववो	रौरवो	३१	१
नयनश्रोत्रास्तृगास्यहृत्सु	नयनश्रोत्रास्यनासाहृत्सु	३१	६
व्योपास्यं	व्योमास्यं	३१	१८
सस्त्रिमुर्त्तिश्च	स त्रिमूर्त्तिश्च	३२	४
गर्ज्जिणी	गर्ज्जिनी	३२	५
कालवज्राव्ये	कालवह्नाव्यो	३२	६
सन्निभ:	संयुत:	३२	६
रोचिका	रेचिका	३५	१७
व्योमार्द्ध	व्योमार्द्धं	३६	२
स्मृति: पञ्चाङ्गत:	स्मृति: पञ्चान्तक:	३७	१

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्
गार्ङ्गी	शार्ङ्गी	३७	[illegible]
ईश्वर:	ई-स्वर:	४१	१
कटभारिश्च	कैटभारिश्च	४२	१५
पञ्चोतक	पञ्चान्तक	४२	१८
श्च गलखड:	च्छगलखड:	४४	१५
द्विदखडीशो	द्विरखडेशो	४४	१७
यामक:	यार्णक:	४४	२२
विझिरुक्ता	विष्णोरुक्ता	४६	८
विद्याह्वया	विल्वाह्वया	४६	११
मालाभीतिमृगाह्वया:	मालेष्टाभीमृगाह्वया:	४६	१५
सप्तमश्लोकात् परं पतितम्			
बाणमुद्रा तत: परश्चुर्जगन्मोहनिका परा ।			
शक्तिपूजने	विघ्नपूजने	४६	१८
सुद्रिका	मुद्रिका	४७	१
न्यासस्य	न्यास: स्यात्	४८	६
देवताह्वार	देवताह्वान	४८	१४
स्वस्वमुद्रेय	शङ्खमुद्रेय	४९	४
क्तत्वा	कृत्वा	४९	७
नवमालिका	वनमालिका	५०	३
ग्रन्थयित्वा	ग्रथयित्वा	५०	११
वाममुद्रेय	काममुद्रेय	५१	१५
५२ पृ: द्वितीय पङ्क्तेरधस्तात् पतितोऽयं श्लोक: ।			
अङ्गुष्ठतर्जन्यग्रे तु ग्रथयित्वाऽङ्गुलित्रयम् ।			
प्रसारयेदक्षमालामुद्रेयं परिकीर्त्तिता ।			
पापजिह्वाश्च	पाशजिह्वे च	५३	१७
चतुरशीतिश्लोकस्य पतितोयमंश: ।			
वीणावादनवद्धस्तौ कृत्वा सञ्चालयेच्छिर:			
ङ्कुशाकृति	ङ्कुशाकृति	५६	६

सूचीपत्रम् ।

घ ।

छ ।

ज ।

द।

विषयः । अर्थः । पृष्ठायां । पंक्ती ।

य ।

विषयः । अर्थः । पृष्ठायां । पंक्ती ।

र ।

विषयः । अर्थः । पृष्ठायां । पंक्तौ ।

विषयः । अर्थः । पृष्ठायां । पंक्तौ ।

सूचीपत्रं सम्पूर्णम्।

अतिरिक्त-सूचीपत्रम् ।